Begins on fol. 3*a*. The other works herein are Nakṣatranighaṇṭu 1*a*, Rāśinighaṇṭu 1*b*, Grahanighaṇṭu 2*a*, Sthānanighaṇṭu 2*b*.

An astrological treatise dealing with the following topics:—

१. रजस्वलाप्रकरण.
२. शकुनप्रकरण.
३. क्षौरप्रकरण.
४. गृहप्रवेश.
५. द्वारबन्धनिर्णय.
६. निषेक.
७. प्रसूति.
८. नामनक्षत्र.
९. मासपक्षतिथिवारफल.
१०. यात्राप्रकरण.

Beginning:

चैत्रे मासे व्रती नारी वैशाखे च पतिप्रिया ।
ज्येष्ठे सर्वगुणोपेता आषाढे दुर्भगा भवेत् ॥
श्रावणे पुत्रसौभाग्यं नभस्ये विधवा भवेत् ।
आश्विजे भोगसम्पन्न(।)मध्या(वन्ध्या)चैव तु कार्तिके ॥

* * * *

प्रथमार्त(र्तवं) तु नारीणां मासाद्य(देः)कथितं फलम् ।

End:

शनिः—

दिशि प्राच्यां कार्यनाश आग्नेय्यां मुदमुच्यते ।
दक्षिणस्यां च दुर्वार्ता नैरृत्यां मित्रसम्भवः ॥
प्रतीच्यां धनलाभं च वायव्यां भोजनं तथा ।
उदीच्यां कलहं प्राप्तमीशान्ये मरणं ध्रुवम् ॥

No. 13565. ज्यौतिषविषयः, आन्ध्रटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 23. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 4*b*. The other works herein are Nāmanakṣatrādinirūpaṇa 1*a*, Nakṣatranighaṇṭu 2*b*, Sthānanighaṇṭu 3*b*, Grahanighaṇṭu 3*b*, Aṅkanighaṇṭu 4*a*.

Incomplete.

Similar to the above.

Beginning:

यात्रा प्रतिपदं श्रेष्ठं द्वितीयं कार्यसाधनम् ।
तृतीयं क्षेममारोग्यं चतुर्थी मरणं ध्रुवम् ॥
पञ्चमी . . . या युक्तं षष्ठी च कलहप्रदम् ।
अन्नपानसमायुक्तं राज्यलाभं च सप्तमी ॥

* * * *

न पूर्वे शनिसोमे च न गुरुर्दक्षिणस्तथा ।
न पश्चाद्भानुशुक्रे च नोत्तरे बुधमङ्गले ॥

* * * *

प्रतिपत् बहुपाकी च द्वितीये चाल्पभोगिनी ।
तृतीये . . . सम्पन्ना चतुर्थे कलहप्रिया ॥

End:

ज्येष्ठादित्यकराश्विनीमृगशिरा(:प्रो)ष्ठानुराधानिला
त्वष्ट्राख्या . . . गदितानि मुनिभिस्तिर्यङ्मुखान्येव तु ।
अश्वेलोष्ट्रतुलायरासभवृषौ रम्भादिनृत्तेवनौ
गन्त्रीयन्त्रबिलप्रवेशगमनं . . भा प्रसिध्यन्ति च ॥

ऊर्ध्वमुखनक्षत्राणि—

पुष्यार्द्रा श्रवणोत्तरा शतभिषा ब्रह्म्या श्रविष्ठान्वया
ऊर्ध्वाख्यानि नवोदितानि मुनिभिर्धिष्ण्यान्यथैतेषु च ।
प्रासादध्वजहर्म्यवारुणगृहा . . . .

No. 13566. ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 13425.

Incomplete.

Deals with the proper time for the performance of various religious rites and ceremonies such as Puṁsavana, Caula, etc.

Beginning :

करादिपश्चोत्तरमूलपूषा विष्णुत्रयाश्विज्यविधीन्दुभेषु ।
आद्यं रजस्सौख्यसुतायुतायुरर्थं सौभाग्यवृद्धिं कुरुतेऽङ्गनानाम् ॥

* * * *

पुंसवनम्—

कुर्यात् पुंसवनं प्रसिद्धविषये गर्भे तृतीयेऽथवा
मासि स्फीततनौ तुषारकिरणे पुष्येऽथवा वैष्णवे ।
हित्वा कर्कटबाहुयुग्ममबलामन्येषुरिक्थे तिथौ
शुक्रे नैघनध(व)र्तिशुक्र रविट्(?) सोमेष्टऽमे वा कृते ॥

End :

चौलम्—

वर्षे तृतीये त्वथ वाब्दपश्चमे गतत्रिभागे प्रवदन्ति चौलम् ।
उदग्गतेऽर्के गुरुशुक्रतेजसे प्रकाशते व्योम्नि च शुक्लपक्षे ॥
आदित्यसौम्यवसुवैष्णवपुष्यपौष्णा अर्केऽश्विनी च विधिवारुणवायुवासवाः ।
चौलं शशाङ्कार्ये . . . . जानाम् ॥

No. 13567. ज्यौतिषविषयः, कर्णाटकटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 16 × 1⅝ inches. Pages, 6. Lines, 5 on a page. Character, Kanarese Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Aṅkanighaṇṭu 3*b*, Nakṣatranighaṇṭu 4*b*, Grahanighaṇṭu 5*a*, Rāśinighaṇṭu 5*b*, Sthānanighaṇṭu 5*b*, Mahādaśāphala 6*b*, Varalakṣmīpūjāvidhāna 9*b*.

Incomplete.

Deals with certain minor astrological matters, such as the duration of time which a disease is likely to last if it attacks a person on a given Nakṣatra, the proper time for sowing seeds, etc.

Beginning :

शशीशौ दशभिः किश्चित् व्याधिश्च परिपीड्यते ।

* * * *

मासत्रयं च स्वाती च विशाखा विंशतिर्दिनम् ।
मैत्रं वा दशरात्रं तु ज्येष्ठा चैवार्धमासके ॥

* * * *

विषयोगः—

अर्कहस्तविपञ्चम्य षष्ठी श्रवणचन्द्रवत् ।
शुभाश्विनी च पञ्चम्यामनूराधबुधाष्टमी ॥
रोहिण्येकादशी मन्दे दशम्यां भृगुरेव च ।
नवम्यां गुरुमौढ्ये च विषयोगः प्रकीर्तितः ॥

End:

रवौ दशांशे शशिषोडशांशे कुजत्रिभागौ बुधदुर्धरासौ ।
शनैश्चरे विंशतिभागहानी.

* * * *

सौम्येन्दुवारोदये ।

वृक्षच्छेदनबीजवापनफलप्रारम्भकार्ये शुभे
कन्याकर्कियुगोऽक्षिमीनमकरं संपूर्णदारे फलम् ॥

No. **13568.** ज्यौतिषार्णवः, आन्ध्रटीकासहितः.

JYAUTIṢĀRṆAVAḤ WITH TELUGU MEANING.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13556.

Contains the Upanayanādhyāya complete, but wants the beginning.

Similar to the work described above.

Beginning:

पृथग्ग . . . लग्नौ सोदरायोपनायने ।
पिताचार्ये च द्वितयं भ्रात्रौ वा पितृसोदरः ॥

* * * *

अभावे तु त्रयाणां तु आचार्यान्यानि योजयेत् ॥
ये अत्र लग्ने यदि पुत्रलग्नं शुभाय मौञ्जीव्रतकर्म कुर्यात् ।
आचार्ययुग्मं खलु वेदियुग्मं नान्दीमुखं स्वस्य पितृंश्च कुर्यात् ॥

End:

मण्डनान्मण्डनं कार्यं मुण्डनान्नैव मुण्डनम् ।
मुण्डनद्वितयं चैव मङ्गलं मङ्गलात्मकम् ॥

* * * *

Colophon:

इति ज्यौतिषार्णवे उपनयनाध्यायः ॥

No. 13569. दामोदरीयम्.

DĀMŌDARĪYAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. *1a* of the MS. described under No. 13420.

Wants the beginning; otherwise complete.

On the proper time for the first initiation of a child to learning, for the performance of Upanayana, etc.

Beginning:

. . . . रतद्युतिमतोर्जीवेऽनुकूले सिते
चन्द्रोऽरिव्ययवर्जिते शुभयुते लग्ने विशुद्धाष्टमे ।
केन्द्रे यान्त्यधनत्रिकोणगशुभैः पापैस्त्रिलाभादिगैः
. . . . ष्टोत्तराः शोभनाः ॥
विद्यारम्भे शुभा रवीन्दुहरपूर्वाचार्यमूलाश्विनी-
चित्राभानुजवक्रदारविरहो लग्नश्च पूर्वोक्तवत् ।
जाड्यं रात्रिपते(ति)र्बुधो मतिहरः शास्त्रं कुजस्याभ्यसेत्
ऋग्वेदादिषु जीवशुक्रकुजाद् होराशिवर्गौ शुभम् ॥

Colophon:

उपनयनविद्यारम्भपटलः ॥

End:

. . . . ।
. . . . ॥
. . . . . जन्मशुक्रादिनवर्गांशोदयं रेवी(वती)-
रोहिण्यौ कलिरुद्रषण्मुखतिथिं श्राद्धेत्यवश्यं त्यजेत् ।
सत्केन्द्रांशकवर्गदृष्टिपशुभं . . . . . त्यानतः
. . . . शुद्धत्रिपुष्करमृते . . . . शुभम् ॥
नेच्छन्ति स्थिरमोदयं कलितिथिं शस्त्राहतस्यात्तमा
भार्षं . . . दरं यमतिथिं चानिष्टमर्के बुधाः ।
दस्रामैत्रमखाबृहस्पतिमरुच्चन्द्रार्कविष्णुत्रये
श्राद्धं कर्तृयशोविवर्धनमिदं पुत्रार्थसंपत्करम् ॥

Colophon:

इति दामोदरीयस्समाप्तः ॥

No. **13570.** दोषनिरूपणम्.

DŌṢANIRŪPAṆAM.

Substance, paper. Size, 8⅜ × 6½ inches. Pages, 12. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 70*a*. The other works herein are Vaidyaviṣaya 1*a*, Jaiminisūtravṛtti: Jyōtiḥpradīpikā 3*a*, Jātakasārasaṅgraha 24*b*, Kālacakra 39*a*, Sarvatōbhadracakra 46*a*

Complete.

Explains the various Dōṣas, i.e., evils or injurious things to be avoided which are found given in a Hindu calendar.

Beginning:

आद्यः पञ्चाङ्गदोषः स्यात् द्वितीयस्सूर्यसङ्क्रमः ।
सङ्ग्रहः कर्तरीदोषः चन्द्रषष्ठाष्टरिष्फगः ॥
उदयास्तमयो दोषः शुद्धिरहितो दुर्मुहूर्तजः ।
गण्डान्तं पातषड्वर्गो भृगुषट्कं कुजाष्टमम् ॥

* * * *

अथ सूर्यसङ्क्रमणम्—
प्राक्पश्चात्सूर्यसङ्क्रान्तेर्नाड्यष्षोडश षोडश ।
त्याज्याश्शोभनकार्येषु षडशीत्याह्वये सति ॥

End:

परित्यज्य महादोषान् शेषयोर्गुणदोषयोः ।
गुणाधिकस्सकृद्दोषः स कर्तुर्मङ्गलप्रदः ॥
दोषा न प्रभवन्त्युक्ता गुणानां भूरिसञ्चये ।
एको यथा तोयबिन्दुरुदर्चिषि हुताशने ॥

Colophon:

इति महादोषस्वल्पदोषाश्चोक्ताः ॥

No. **13571.** दोषापवादः.

DŌṢĀPAVĀDAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 13530.

Incomplete.

Explains the astrological circumstances which are considered to be inauspicious for fixing the time of the marriage, with an enumeration of the exceptions to the general statement.

Beginning:

त्याज्याश्च सूर्यसङ्क्रान्तेः पूर्वतः परतस्सदा ।
विवाहादिषु कार्येषु नाड्यः षोडश षोडश ॥
लग्नं च होरा द्रेक्काणा नवांशो द्वादशांशकः ।
त्रिंशांशकस्तु विज्ञेयः षड्वर्गोऽयं क्रमाद्विधिः ॥

* * * *

भृगुषट्काह्वयो दोषो लग्नात् षट्कगते सिते ।
उच्चगे शुभसंयुक्ते तं लग्नं सर्वदा त्यजेत् ॥
कुजाष्टमो महादोषो लग्नादष्टमगे कुजे ।
शुभत्रययुते लग्ने त्यजेत्तत्त्वङ्गतो यदि ॥

* * * *

End:

अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः ।
दशशिखिमनुयुक् तथेन्द्रियांशे स्तनवकविंशतिभेस्तु तेऽस्तनीचाः ॥
कन्या राहुग्रहं प्रोक्तं राहोश्च मिथुनं स्मृतम् ।
वृश्चिकं चापरे प्राहुः केतुरुच्चघटस्स्मृतः ॥

No. 13572. द्वादशकूटविवरणम्.
DVĀDAŚAKŪṬAVIVARAṆAM.

Pages, 16. **Lines,** 10 on a page.

Begins on fol. 66*a* of the MS. described under No. 1512.

Complete.

Explains the 12 astrological points of agreement that require to be satisfied between two persons who are to be married to each other. These are :—

दिनकूट.	राश्यधिपकूट.
गणकूट.	वश्यकूट.
माहेन्द्रकूट.	रज्जुकूट.
स्त्रीदीर्घकूट.	वेधकूट.
योनिकूट.	वर्णकूट.
राशिकूट.	नाडीकूट.

The colophon at the end is apparently wrong.

Beginning:

दिनं गणश्च माहेन्द्रं स्त्रीदीर्घं योनिमेव च ।
राशिराश्यधिपो वश्यो रज्जुर्वेधास्तथैव च ॥

* * * *

द्वितीये त्वंशका वर्ज्यास्तृतीये सकलाश्शुभाः ॥

End:

गुणैकवर्णे द्विगुणं च वश्यं त्रिभिश्च तारा चतुरश्च योनिः ।
पश्चा खगः षड्गुणतो गणश्च भकूटसप्ताष्टगुणैकनाडी ॥

अष्टादशं जघन्यं स्यात् चतुर्विंशतिमध्यमाः ।
द्वात्रिंशदुत्तराः प्रोक्ता अथ(त) ऊर्ध्वं शुभावहाः ॥

Colophon:

इति राशिकूटस्समाप्तः ॥

The scribe adds—

कीलकाब्दे शुचौ मासि दशम्यामिन्दुवासरे ।
लिखितं रङ्गराजेन राशिकूटं यथाक्रमम् ॥

No. **13573.** **द्वादशकूटविवरणम्.**

DVĀDAŚAKŪṬAVIVARAṆAM.

Pages, 18. Lines, 5 on a page.

Begins on fol. 11*b* of the MS. described under No. **13540.**

Complete.

Same work as the above.

No. **13574.** **द्वादशकूटविवरणम्.**

DVĀDAŚAKŪṬAVIVARAṆAM.

Substance, paper. Size, 14 × 1¼ inches. Pages, 12. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 39*b* The other works herein are Jātakacandrikā (with Telugu meaning) 1*a*, Jātakacandrikā 5*a*, Hōrāsārabhāvaphala 11*a*, Bālāriṣṭādhyāya 23*a*, Makhāvēdhādinirūpaṇa 29*b*, Mahādaśādinirūpaṇa 33*a*.

Complete.

Same work as the above.

No. **13575.** **द्वादशकूटविवरणम्.**

DVĀDAŚAKŪṬAVIVARAṆAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 140*a* of the MS. described under No. **2040.**

Incomplete.

Same work as the above.

No. 13576. द्वादशकूटविवरणम्.
DVĀDAŚAKŪṬAVIVARAṆAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 2824.
Incomplete.
Same work as the above.

No. 13577. द्वादशकूटविवरणम्.
DVĀDAŚAKŪṬAVIVARAṆAM.

Pages, 11. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13530.
Incomplete.
Same work as the above.

No. 13578. द्वादशकूटविवरणम्.
DVĀDAŚAKŪṬAVIVARAṆAM.

Substance, palm-leaf. Size, 14½ × 1⅜ inches. Pages, 19. Lines, 6 on a page. Character, Telugu and Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nakṣatranighaṇṭu 10*a*, Lagnanighaṇṭu 11*b*, Nāmanakṣatramāsanirṇaya 12*a*, Rāśinighaṇṭu 12*b*, Grahanighaṇṭu 13*a*, Gōcārādiphala 14*a*.

Almost complete.

Same work as the above, but slightly different in the end.

End:

स एव माहेन्द्रदिनादियुक्तो राशीशयोमी(नी) सहितो न दोषः ॥

इति नाडीकूटः ।

वर्णो वश्यं तारा योनिग्रहगणभकूटनाडीषु ।
षट्त्रिंशद्गुणसङ्ख्या विंशत्यधिका शुभैकवृद्धिः स्यात् ।'
पितृष्वसृसुतायाश्च सुताया मातुलस्य च ।
विवाहदिनकूटादि न विचार्य प्रवर्तयेत् ॥

(घाततिथिनक्षत्रवारचन्द्राः ॥)

मेषे च षष्ठी रविमाघजन्म वृषे चतुर्थी शनिहस्तपश्च ।
युग्मेऽष्टमीन्दुः पवनो नव स्यात् कुलीरषष्ठी बुधमैत्रयुग्मम् ॥

* * * *

ऋक्षान्तघटिकामानं विषमानेन ताडितम् ।
षष्टिभिर्हरते लब्धं पूर्वऋक्षेण योजयेत् ॥

No. **13579.** नवग्रहचूडामणिः.

NAVAGRAHACŪḌĀMAṆIḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 62*b* of the MS. described under No. 13425.

Incomplete.

The name given above for the work is what is found in the margin of fol. 62*b*. The portion contained in the MS. describes what particular religious observances, feasts, fasts or other undertakings may be conducted on each of the 27 days when the Moon is in contact with each of the 27 constellations.

Beginning:

हस्त्यश्वबन्धरयया . . . विधानमथाश्विनीषु ॥

भरणी—

अधोमधूतवधबन्धविषाग्निशस्त्राबीभत्सभीतिकरसाहसशौर्यकर्म ।
द्यूताभिचारविधिमन्त्रबिलप्रवेशकन्याजनानियमभे खलु यान्ति सिद्धिम् ॥

End:

पूर्वाभाद्रानिर्णयः—

विद्यारम्भं बन्धनं कुञ्जराणां भे(वे)तालाद्यं वेशनं कन्यवादम् ।
द्यूतं चौर्यं हिंसयन्त्राप्रयोगं शास्त्राभ्यासं चैकपादे विधेयः ॥

* * * *

रेवती निर्णयः—

उपनयनं क्षुरकर्मविवाहं पुरनगरामरवास्तुनिवेशम् ।
करितुरगाद्यवरोहणमुत्तमं यदभिशुभं च तत्तच्छुभानि पौष्णे ॥

No. **13580.** नारदीयसंहिता.

NĀRADĪYASAṀHITĀ.

Pages, 214. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13490.

Incomplete.

Same work and MS. as that described under No. 41, on pages 88, 246 and 247 of M. Seshagiri Sastri's Report No. 2.

No. **13581.** नारदीयसंहिता.

NĀRADĪYASAMHITĀ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 3483.

Contains the 25th Adhyāya.

Same work as the above.

Beginning:

आधानादष्टमे वर्षे जन(न्म)तो वाग्रजन्मनाम् ।
राज्ञामेकादशे मौञ्जीबन्धनं द्वादशे विशाम् ॥
जन्मतः पञ्चमे वर्षे वेदशास्त्रविशारदः ।
उपनीतो यतः श्रीमान् कार्यं तत्रोपनायनम् ॥
बालस्य बलहीनोऽपि शान्त्या जीवफलप्रदः ।
यथोक्तवत्सरे कार्यमनुक्ते चोपनायनम् ॥
दृश्यमाने गुरौ शुक्रे शाखेशे चोत्तरायणे ।
वेदानामधिपो जीवः शुक्रभौमबुधाः क्रमात् ॥

* * * *

प्रागादौ शनिवासरादिगदितास्सूर्योदयोऽष्टौ ग्रहा
नागानागनगानिधे निशिनिशौ नादौ नसौ नारिषु ।
हानिः प्रीतिदुरुक्तिबन्धुकनकाब्धिधान्नतापार्तिता
श्रोतुः प्राणभृतः क्षुते फलमिदं मृत्युस्सदा गोक्षुध(त)म् ॥

विवाहाध्यायः—

युग्मेऽब्दे जन्मतः स्त्रीणां प्रीतिदं पाणिपीडनम् ।
न्याय्यं पुंसामयुग्मेऽब्दे व्यत्यये नाशयेत्तयोः ॥

End:

आदित्यवारे त्यज रोगपञ्चकं राजानमिन्दौ क्षितिजेऽग्निपञ्चकम् ।
गुरज्ञ(रौच)चोरस्सितमन्दमृत्युः सदा त्यजेन्मृत्युरिति ब्रुवन्ति ॥

Colophon:

इति नारदीये विवाहाध्यायः पञ्चविंशतिः ॥

No. **13582.** निर्णयकौमुदी.

NIRṆAYAKAUMUDĪ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{3}{8}$ inches. Pages, 178. **Lines,** 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are **Bhāvakaumudī 91*a*, Daśāsāra 158*a*.**

Complete.

A work in astrology based upon the statements of several Smṛti writers and dealing with the proper time for the performance of the different rites and ceremonies. The author is Vēṅkaṭayajvan of Cintalapāṭi family and a native of Kuṇḍinapaṭṭaṇa. He states that he wrote a commentary named Ujjvalā on the Kālāmṛta.

Beginning:

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥
श्रीमच्चिन्तलपाटिवंशशशिना दैवज्ञनेत्रोत्पला-
नन्दं नाटयता गणेशमनिशं नत्वा मृडानीपतिम् ।
श्रीमद्वेङ्कटयज्वना स्मृतिवचःपुञ्जं समाकृष्य तत्
सारं निर्णयकौमुदी बुधजनानन्दाय सा तन्व(न्य)ते ॥
येनाकारि पुरा मुदे कृतधियां कालामृतस्योज्वला
टीका ज्यो(ज्यौ)तिषशास्त्रतत्त्वमखिलं सङ्गृह्य निस्संशयम् ।
सोऽयं निर्णयकौमुदीं दशदिशां चान्येषु विष्फूर्जयन्
विद्वत्पुञ्जशिरोमणिर्विजयते श्रीकुण्डिने पट्टणे ॥

अथेदानीमत्रभवान् कविरनेकस्मृतिगतवचननिकरपर्यालोचनासमर्थानां तदर्थानामनायासेन जिज्ञासूनां कृते चैत्रादिद्वादशमासेषु ये कालाधिकृतनिर्णयास्तान् तत्तन्मुनिवचनपर्यालोचनया विवक्षुस्तावत् संवत्सराधिपतिनिर्णयमारभते । तथाहि—

यस्मिन्नब्दे यदा चैत्रे अधिमासो भवेद्यदि ।
अधिमासं परित्यज्य निजचैत्रादिवारपम् ॥
अब्दनाथं प्रशंसन्ति गार्ग्यकाश्यपदेवलाः ।

End:

लक्ष्मीगौरीव्रतम् ।

Colophon:

इति श्रीमद्वेङ्कटयज्वकृतनिर्णयकौमुद्याख्योऽयं ग्रन्थस्समाप्त आसीदिति ज्ञातव्यम् ॥

चन्द्रशृङ्गनिर्णयः, चन्द्रोदयज्ञानम्—

सूर्याष्टविश्वरुद्राष्टतिथ्यंशाश्च खखागिभिः ।

No. **13583.** बृहत्संहिता.

BṚHATSAṀHITĀ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 214. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains Adhyāyas 1 to 96.

A work treating of the third branch (Saṁhitā) of astrology. The different subjects dealt with herein are given in the end extracted under the next number: by Varāhamihira.

Beginning:

अथ वराहमिहिरकृता संहिता प्रारभ्यते—

जयति जगतः प्रसूतिर्विश्वात्मा सहज[वि]भूषणं जगताम् ।
द्रुतकनकसदृश(दश)शतमयूखमालार्चितस्सविता ॥
प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यमस्स्पष्टमभिधातुम् ॥
मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम् ।
तुल्येऽर्थेऽक्षरभेदादमुत्र का(वा)विशेषोक्तिः ॥

* * * *

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कार्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणिते च या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराख्याङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥
वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः ।
होरागतं विस्तरश(श्च) जन्म यात्राविवाहैस्सह पूर्वमुक्तम् ॥
प्रश्नप्रतिप्रश्नकथाप्रसङ्गान् स्वल्पोपयोगान् ग्रहसंभवांश्च ।
सन्त्यज्य फल्गूनि च सारभूतं भूतार्थमर्थैस्सकलैः प्रवक्ष्ये ॥

Colophon:

इति वराहमिहिरकृतायां शास्त्रोपनयः प्रथमाध्यायः ॥

See under the next number for the end.

No. **13584.** बृहत्संहिता.

BṚHATSAṀHITĀ.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{1}{4}$ inches. Pages, 90. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Adhyāyas 48 to 106.

Same work as the above.

Date of transcription: Friday, the 14th day of the bright fortnight of the Mārgaśira month in the year Dhātṛ.

See under the previous number for the beginning.

End :

ज्योतिश्शास्त्रसमुद्रं प्रमथ्य मतिमन्दराद्रिणाथ मया ।
लोकस्यालोककरः शास्त्रशशाङ्कस्समुत्क्षिप्तः ॥
पूर्वाचार्यग्रन्था[न्] नोत्सृष्टाः कुर्वता मया शास्त्रम् ।
तानवलोक्येदञ्च प्रयतध्वं कामतस्सुजनाः ॥
अथहभृ(वा कृ)शमपि सुजनः प्रथयति दोषार्णवाद्गुणं दृष्ट्वा ।
नीचस्तद्विपरीतः प्रकृतिरियं सर्वसाधूनाम् ॥
दुर्जनहुताशतप्तं काव्यसुवर्णं विशुद्धिमायाति ।
श्रावयितव्यं तस्मात् दुष्टजनस्य प्रयत्नेन ॥
ग्रन्थस्य यत्प्रचरतोऽस्य विनाशमेति
लेख्याद्बहुश्रुतमुखाधिगमक्रमेण ।
यद्वा मया कुकृतमल्पमिहाकृतं वा।
कार्यं तदत्र विदुषा परिहृत्य रागम् ॥
दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम् ।
शास्त्रमुपसंगृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः ॥

Colophon :

इत्युपसंहाराध्यायः षडधिकशततमः ॥

अथ ग्रन्थानुक्रमणिका यथा:—

शास्त्रोपनयः पूर्वं संवत्सरसूत्रमर्कचारश्च ।
शशिराहुभौमबुधगुरुसितमन्दाशिखिग्रहाणां च ॥
चारश्चागस्त्यमुनेस्सप्तर्षीणां च कूर्मयोगश्च ।
नक्षत्राणां व्यूहो ग्रहभक्तिर्ग्रहविमर्दश्च ॥
ग्रहशशियोगस्सम्यक् ग्रहवर्षफलं ग्रहाणां च ।
शृङ्गाटसंस्थितानां मेघानां गर्भधारणं चैव ॥
धारणवर्षणरोहिणिवाय्व्याषाढभाद्रपदयोगाः ।
क्षणवृष्टिः कुसुमलतास्सन्ध्याचिह्नं दिशां दाहः ॥

भूकम्पोल्कापरिवेषलक्षणं शक्रचापखपुरं च ।
प्रतिसूर्यो निर्घातस्सस्यद्रव्यार्घकाण्डं च ॥
इन्द्रध्वजनीराजनखञ्जनकोत्पादबर्हिचित्रं च ।
इति सप्तचत्वारिंशदध्यायाः प्रथमनिर्दिष्टाः ॥
एतत्कोशान्तरे लिखितमस्तीतिबोध्यम् ।
पुष्याभिषेकपट्टप्रमाणमसिलक्षणं वास्तु ॥
उदकार्गलमारामिकममरालयलक्षणं कुलिशलेपः ।
प्रतिमा वनप्रवेशः सुरभवनानां प्रतिष्ठा च ॥
चिह्नं गवामथ शुनां कुक्कुटकूर्माजपुरुषचिह्नं च ।
पञ्चमनुष्यविभागः स्त्रीचिह्नं वस्त्रविच्छेदः ॥
चामरदण्डपरीक्षा स्त्रीस्तोत्रं चापि सुभगकरणं च ।
कान्दर्पिकानुलेपनपुंस्त्रीकाध्यायशयनविधिः ॥
वज्रपरीक्षा मौक्तिकलक्षणमथ पद्मरागमरकतयोः ।
दीपस्य लक्षणं दन्तधावनं शाकुनं मिश्रम् ॥
अन्तरचक्रं विरुतं श्वचेष्टितं विरुतमथ शिवायाश्च ।
चरितं मृगाश्वकरिणां वायसविद्योत्तरं च ततः ॥
पाको नक्षत्रगुणाः तिथिकरणगुणास्सधिष्ण्यजन्मगुणाः ।
गोचरस्तथा(मथ)ग्रहाणां कथितो नक्षत्रपुरुषश्च ॥
शतमिदमध्यायानामनुपरिपाटी क्रमादनुक्रान्तम् ।
अत्र श्लोकसहस्राण्याबद्धान्यूनचत्वारि ॥

Colophon:

इति ग्रन्थानुक्रमणी समाप्ता ॥
इति वराहमिहिरविरचिता बृहत्संहिता समाप्ता ॥

No. **13585.** बृहत्संहिता, सव्याख्या.

BṚHATSAṀHITĀ WITH COMMENTARY.

Substance, paper. Size, $9\frac{1}{8} \times 7\frac{3}{8}$ inches. Pages, 133. Lines, 40 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 31*a*. The other works herein are Uparāgakriyākrama 1*a*, Grahaśāntividhi 94*b*.

Contains the Adhyāyas 1 to 47.

The commentary here is entitled Utpalaparimala. From another copy of the commentary described below the name of the commentator is known as Bhāskara of Naidhruva Kāśyapagōtra He was the son of Kumāra and grandson of Rāma of Vārṣagaṇya family. The commentator salutes Varāhamihira and Utpala and states that he has followed Bhaṭṭōtpala. The author was a disciple of Nirupamabōdha.

Beginning :

जयति जगतां निदानं श्रीनिलयस्स्वानुभूतिसुखसिन्धुः ।
श्रीनिरुपमबोधाख्यो महाविभूतिर्महाविष्णुः ॥
श्रीशारदागणपतिक्षितिचन्द्रचान्द्रिकाव्यप्रभाकरकुजाङ्गिरसार्किभानि ।
सङ्कर्षणद्रुहिणगर्गमुखान्मुनीन्द्रान् वन्दे वराहमिहिरं गुरुमुत्पलं च ॥
वार्षगण्यकुलरामनन्दनश्रीकुमारतनयेन योगिना ।
श्रीवराहमिहिरोक्तसंहिताव्याक्रियोत्पलकृता समस्यते ॥

अथावन्त्यकुलाचार्यवराहमिहिरः शाखास्कन्धमारभमाणस्तदादौ शिष्टाचारसिद्धं प्रारब्धाविघ्नपरिसमाप्तिप्रचयगमनफलकं स्वशास्त्रं प्रतिपाद्य अभीष्टदेवतादि(न)त्यात्मकं परब्रह्मविषयं वाङ्मनःकायनिर्मितं प्रमाण(णाम)रूपं मङ्गलाचरणं वाक्येन निबध्नाति शिष्यशिक्षायै—

मू ॥ जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः ।
धृतकनकसदृशदशशतमयूखमालार्चितस्सविता ॥

व्या ॥ जयति जगतः प्रसूतिरिति जयतिपदेन(दं) सर्वोत्कर्षेण वर्तनपरो-(रम् ।) जगतः प्रसूतिः उपादानकारणं निमित्तकारणं च । विश्वात्मा जगन्मयः, जगदन्तरात्मा च । नभसः सहजभूषणत्वेन नित्यत्वं द्योत्यते ।

* * * *

अथ ग्रन्थस्य विविदिसितस्य उपादेयात्मकतया समूलतासम्बन्धमभिधेयं प्रयोजनं च प्रतिपादयति—

मू ॥ प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यतस्स्पष्टमभिधातुम् ॥

End :

एवमस्माभिर्भट्टोत्पलानुसारिभिश्शाखास्कन्धस्याङ्गप्रायं ग्रहचारादिकं श्लोकसङ्ख्यासाङ्गप्रदर्शनपूर्वकं किञ्चिद्विस्तरेण व्याख्यातम् ॥

अतःपरमुपाङ्गप्रायं भूपचिन्तादिकं ज्यौतिषपरिभाषानिरपेक्षप्रायं ततः किञ्चित्सङ्क्षेपेण व्याख्यायते ।

अत्र च पूर्वभागे भट्टोत्पलानुसारेऽपि शास्त्रान्तरस्थाः केचिदंशाः प्रासङ्गिकास्तत्र तत्राध्याये अस्माभिर्लिखितास्सन्ति । तेषामेषानुक्रमणिका—

तत्र सांवत्सराध्याये मलमाससङ्क्रमं तत्फलं च । दैवज्ञपुरोहितवरणम् ॥

* * * *

मयूरचित्रे तु कान्तिचारराशिविशेषचारत्रोरि(?) ग्रहयोगादिफलानि ॥

Colophon:

इति व्याख्यन्निरुपमबोधशिष्यः कुमारजः ।
योगी वराहमिहिरसंहिताबर्हिचित्रकम् ॥
इत्युत्पलपरिमले सप्तचत्वारिंशोऽध्यायः ॥
इति पूर्वं समाप्तम् ॥

No. 13586. बृहत्संहिता, सव्याख्या.

BṚHATSAṀHITĀ WITH COMMENTARY.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 291. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the Adhyāyas 55 to 100 of which the 67th and the 68th are incomplete and the 69th is omitted. The numbering of the Adhyāyas in this MS. is different from that in the previous ones.

Same work as the above The commentator's name is given as Bhāskara.

Colophon:

इति व्यख्यन्निरुपमबोधशिष्यः कुमारजः ।
योगी वराहमिहिरशाखार्चास्थापनविधिः ॥ इति ॥
उत्पलपरिमलसंज्ञानि(नै)र्ध्रुवकाश्यपकुलप्रसूतस्य ।
त्रिस्कन्धवल्लभस्य व्याख्येयं भास्करार्यस्य ॥
इत्युत्पलपरिमले षष्टितमोऽध्यायः ॥

No. 13587. बृहत्संहिता, सव्याख्या.

BṚHATSAṀHITĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches Pages, 120. Lines, 7 on a page. Character, Telugu and Grantha Condition, slightly injured. Appearance, old.

Contains the Adhyāya 54 incomplete, and 86 to 100 complete.

Same work as the above.

See under the previous number for the beginning.

End:

अत्र श्रीपतिः—

प्रायेण भोस्सह . . हीनवर्णैः प्राप्याश्च सन्ध्यासमयं विवाहे ।

शंसन्ति यावत्स . . . . नगोखरोत्खातिरजोविधानम् ॥

Colophon:

इत्युत्पलपरिमले शततमोऽध्यायः ॥

अथ नक्षत्रजाताध्यायः—

अश्विन्यादिनक्षत्रस्थे चन्द्रे जातस्य फलमिदमिति श्लोकचतुर्दशेन . . . .
नक्षत्रमर्धश्लोकेनाह । प्रियभूषणः स्व.

No. 13588. बृहत्संहिता, सव्याख्या.

BṚHATSAṀHITĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 155. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Adhyāyas 55 to 85 complete and 86 incomplete.

Same work as the above.

No 13589. बृहत्संहिता, सव्याख्या.

BṚHATSAṀHITĀ WITH COMMENTARY.

Pages, 13. Lines, 18 on a page.

Begins on fol. 29*a* of the MS. described under No. 3550.

Contains the last portion of the 54th Adhyāya and the 55th Adhyāya.

Same work as the above.

No. 13590. मासाद्यधिष्ठानदेवतानिर्णयः.

MĀSĀDYADHIṢṬHĀNADEVATĀNIRṆAYAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 99*a* of the MS. described under No. 2840.

Complete.

The following topics are dealt with herein :—

मासदेवता.	वारदेवता.
जन्मनक्षत्रनिर्णय.	तिथिदेवता.
योगदेवता.	

Beginning :

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः .
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ।
योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ॥

End :

मणिभद्रश्च कीनाशो रव्यादीनां तु देवताः ।
अनन्तः पितरस्सर्पो रुद्राश्च स्थिरदेवताः ॥

No. **13591.** मुहूर्तग्रन्थः, कर्णाटकटीकासहितः.
MUHŪRTAGRANTHAḤ WITH KANARESE MEANING.

Pages, 30. Lines, 3 on a page.

Begins on fol. 93*a* of the MS. described under No. 13540.

Incomplete.

On the characteristic qualities of each of the 15 Muhūrtas into which the day is divided, and on the fixing of moments for the performance of certain religious observances.

Beginning :

रौद्री, श्वेतज, मैत्री, चक्रवाक, सावित्री, वैरोचन, जयदेव, अभिजातु, रावण, वलवदन, विजय, नन्दन, यमी, शोमधर, भाग्यधर, इति १५ मुहूर्तानि ।

*　　*　　*　　*

रौद्री रोगमृत्युं च श्वेतजं लाभमेव च ।
मैत्रं च प्रीतिलाभं च चक्रवाकेन संहतिः ॥

सावित्री भूमिलाभकृत् . . . . ।
वैरोचनं बन्धनं स्याज्जयदेवो भवेज्जयम् ॥

*　　*　　*　　*

Colophon :

इति कर्णवेधन ॥

*　　*　　*　　*

शतधन्वे तु यत् क्षेत्रे राहुर्वह्निविनाशकृत् ।

Colophon:

इति शनिचारः ॥

End:

ग्रहहोरा—

अर्कः शुक्र . . . . मन्दजीवधरासुताः ।
भानुहोराकृतं कार्यं शुक्रहोराविवाहकम् ॥

बुधहोरा.

No. 13592. वास्तुशास्त्रविधानम्.
VĀSTUŚĀSTRAVIDHĀNAM.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 90*a*. The other works herein are Sālagrāmalakṣaṇa (Telugu) 1*a*, Jyautiṣaviṣaya 7*a*, Adhiṣṭhānalakṣaṇa (with Telugu meaning) 49*a*, Bṛhajjātaka (with Telugu meaning) 59*a* and 108*a*.

Contains the 31st Adhyāya which treats of the proper time for the construction of buildings, for the laying down of villages, etc.

Name of the scribe: Pedda Guruvayya, son of Peddarāja of Vellūri family, Karṇam of Kottapālayam. Date of copying: Wednesday, the 3rd day of the bright fortnight in the month of Śrāvaṇa of the year Vikārin.

Beginning:

अथ वक्ष्ये विशेषेण मुहूर्तानां च लक्षणम् ।
तिथिवारादिनक्षत्रयोगं करणक्रमेण तु ॥
शुभाशुभद्वयं ज्ञात्वा प्रतिष्ठानां विशेषतः ।
चैत्रे वैशाखश्रवणे मार्गशीर्षे च फाल्गुने ॥
ज्येष्ठकार्तिकमित्युक्तमितरेषां च वर्जयेत् ।
आश्विनौ अश्विनी चैव शान्तरूपं सुवर्गणम् ॥
चन्द्राणामधिदैवं च मेषराशिस्तथैव च ।
पुंलिङ्गं निजपक्षं च नक्षत्राधोर्ध्वमुख्य च ॥

End:

जीवन्यासं नेत्रमोक्षणं धनुर्लग्नं विशेषतः ।
मीनश्च विश्वलग्नानां कर्षणं लोहकर्मणाम् ॥

अधिवासत्रयश्चैव मधूच्छिष्टक्रियोत्तमम् ।
तुष्टकर्मविशेषेण मीनलग्ने विशेषतः ॥

Colophon:

इति परशिवविश्वकर्मण्ये वास्तुशास्त्रे तिथिवारनक्षत्रादियोगकरणमुहूर्तविधानोनाम एकत्रिंशोऽध्यायः ॥

वास्तुशास्त्रविधानं सम्पूर्णम् ॥

No. 13593. विद्यामाधवीयम्.

VIDYĀMĀDHAVĪYAM.

Substance, palm-leaf (Śrītāla). Size, 9¼ × 1½ inches. Pages, 30. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Breaks off in the 2nd Adhyāya.

A work dealing with the determination from an astrological point of view of the proper time for the performance of religious rites and ceremonies. By Vidyāmādhava who proposes to put in correct language the essence of what is contained in the works of Vasiṣṭha, Bṛhaspati, Gārgya and others.

Beginning:

जयत्यमेयांशुनिधिर्जगत्त्रयीप्रबोधहेतुस्सविता त्रयीमयः ।
न सर्वदर्शित्वमितो विना भवेदितीव यन्नेत्रमधत्त शङ्करः ॥
स्वकीयशास्त्रे बहुशोऽपशब्दानमी वदन्तीति जगत्प्रसिद्धम् ।
सुदुस्सहं तत्परिवादशल्यं आहि(मौहू)र्तिकानामपहर्तुकामः ॥
वसिष्ठवागीश्वरगार्ग्यमुख्यैः महर्षिभिर्विस्तरतः कृतेषु ।
शास्त्रेषु बुद्ध्या परिगृह्य सारं लोकोपकाराय च कीर्तये च ॥
श्रुताखिलव्याकरणो हिमुत्तमै . . . गतपद्यगुम्भनम् ? ।
विचित्रवृत्तं लघु संमतं सतामिदं विधास्यामि मुहूर्तदर्शनम् ॥
क्रमेण राशिग्रहतारकादेः संज्ञां वयं तावदिहाभिदध्मः ।
शास्त्रार्थबोधः खलु तस्य तस्य संज्ञामविज्ञाय जनस्य न स्यात् ॥
अजाख्यमाद्यं प्रवदन्ति मेषराशिं वृषो गौर्वृषभाभिधानः ।
विणा(?)यमाख्यं मिथुनं नृयुग्मं स्यात्कर्कटः कर्कटकश्च कर्की ॥

* * * *

Colophon :

इत्थं विद्यामाधवीयाभिधाने चत्वारिंशत्संयुतैरष्टभिश्च ।
श्लोकैर्विद्यामाधवेनात्र शास्त्रे संज्ञाध्यायो गुम्भितस्सोऽयमाद्यः ॥
अथादिशास्त्राभिहितान् प्रसिद्धान् संगृह्य दैवज्ञहिताय कांश्चित् ।
इहाभिधास्यामि मुहूर्तदोषान् कार्त्स्न्येन कस्तत्कथनाय शक्तः ॥

End :

सौरो राशिषु सूर्यसङ्क्रमणतश्चान्द्रस्तु दर्शान्ततो
विज्ञेयस्सितपक्षपक्षतिमुखः त्रिंशद्दिनैस्सावनः ।
नाक्षत्रः शितमण्डलादिति मता मासाश्चतुर्धा क्रमा-
दन्तेऽहस्त्रयमाद्ययोश्चरमयोः दिक्षु च नाडीस्त्यजेत् (?) ॥

No. **13594.** विद्यामाधवीयम्, केरलटीकासहितम्.
VIDYĀMĀDHAVĪYAM WITH MALAYĀLAM MEANING.

Substance, palm-leaf (Śrītāla). Size, $10\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 164. Lines, 7 on a page. Character, Malayālam. Condition, good. Appearance, old.

Contains the 2nd Adhyāya incomplete.

Same work as the above.

Beginning :

अथादिशास्त्राभिहितान् प्रसिद्धान् सङ्गृह्य दैवज्ञहिताय कांश्चित् ।
इहाभिधास्यामि मुहूर्तदोषान् कार्त्स्न्येन कस्तत्कथनाय शक्तः ॥
दुष्टांस्तिथ्यृक्षवारानथ विषघटिकां कृष्णपक्षापराह्णौ
धूमादीन् पञ्च सौरान् गुलिकदिनगदौ सग्रहार्थप्रहारौ ।
विष्टिं षड्दुष्टयोगानुडुतिथिसुषिरे कालचक्रार्धपातान्
स्थूणांस्त्रींस्त्रींश्च मृत्यून् विहगहिमशिखे कण्टकौ द्वौ च गण्डम् ॥

* * * *

अग्न्यन्तकद्विरसनत्रिदशेन्द्ररुद्राः पूर्वात्रयं च बहुलं पितृमूलसर्पाः ।
छिद्राश्च पापदिवसास्पदकालहोराः त्याज्यो गणोऽयमखिलासु शुभक्रियासु ॥

End :

दग्धं यदृक्षं खचरेण भूयः शुक्रांशयोगादुपबृंहते तत् ।
तपावसाने वनमुष्णभासा तप्तं यथाद्यम्बुनिपातयोगात् ॥

No. 13595. संहिताशिरोमणिः.
SAṀHITĀŚIRŌMAṆIḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 385. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A work on the third, i.e., Saṁhitāskandha of astrology. An incomplete list of the topics dealt with herein is given at the end of the work which is extracted below.

Beginning:

वन्देऽहं संविदे देवं श्रीनृसिंहं सदा मुदा ।
इन्दिरानन्दसन्दोहमन्दिरं वन्दितं सुरैः ॥
नत्वा सिद्धान्ततत्त्वज्ञान् संहितानां शिरोमणिम् ।
निषेकादिक्रियाकालज्ञप्त्यै कुर्वे यथामति ॥
विद्यन्ते प्रथमार्तवादिसमये ज्ञानार्थकाः संहिता-
ग्रन्थास्तत्परिशीलने बहुतया ये वालसास्ताश्रिकाः ।
तत्तेषां सुखबोधहेतुसकलग्रन्थान् समालोड्य तान्
निष्कृष्यात्र तदर्थसारमखिलं सङ्गृह्यतेऽनुक्रमात् ॥
क्रमेण राशिग्रहतारकादेः संज्ञां वयं तावदिहाभिदध्मः ।
शास्त्रावबोधः खलु तस्य तस्य संज्ञाम (विज्ञाय) जनस्य न स्यात् ॥

नक्षत्रप्रतिनामानि--

वसिष्ठादिमुनिप्रोक्तसंहितासूक्तमार्गतः ।
अश्विन्यादिकताराणां प्रतिनामानि वच्म्यहम् ॥
अश्विनी तुरगो दस्र अश्वी वाजी हयो हलः ।
इतराण्यश्वनामानि चाश्विन्यृक्षे प्रयोजयेत् ॥

End:

वारेष्वेव कविज्ञजीवशशिनां श्रोणत्रये ज्योत्तरा-
मैत्रादित्यकरत्रयान्त्यशशभृद्दस्रप्रवेशोडुषु ।
भद्रापूर्णजयासु चोदगयने शुक्रेज्ययोर्व्यस्तयोः
कार्या पुण्यकरी विहाय च कुहूं देवप्रतिष्ठा शुभाः ॥
मन्दवारे दिवा पूर्वे तद्रात्रौ चान्नमेव च ।
दक्षिणस्यां भानुवारे नैरृत्यामिन्दुवासरे ॥

पश्चिमे भौमवारे च वायोर्दिशि बुधे तथा ।
उत्तरे गुरुवारे च भृगुरीशान्यसंस्थितिः ॥
षष्ठी च सप्तमी चैव अष्टमी नवमी तथा ।
द्वादश्येकादशी चैव त्रयोदश्यर्कतो विषाः ॥

Colophon :

इदंसंहिताशिरोमणिग्रन्थः समाप्तः ॥

The following subjects are dealt with :—

नक्षत्रप्रतिनामानि.
राशिप्रतिनामानि.
लग्नप्रतिनामानि.
ग्रहप्रतिनामानि.
नक्षत्रांशत्वेन राशिविभागः.
द्वादशराशयः.
लग्नस्थानविशेषसंज्ञा.
उच्चनीचमूलत्रिकोणम्.
ग्रहदृष्टयः.
पुंस्त्रीनपुंसकग्रहाः.
ग्रहकृतयः.
ग्रहसञ्चाराः.
ग्रहाधिपत्यम्.
ग्रहाणां पापसौम्यत्वम्.
ग्रहजातयः.
ग्रहाणां वयोनिर्णयः.
दिगाधिपत्यम्.
शत्रुमित्रत्वम.
ग्रहगुणाः.
चरस्थिरग्रहाः.
तिथीनां नन्दादिसंज्ञाः.
वर्गोत्तमांशाः.
तिथ्यधिपरात्र्यधिपाः
नक्षत्राधिपाः.
चरास्थिराः.
अष्टकादिनक्षत्राणि.
तिर्यगधोमुखनक्षत्राणि.
जघन्यादिनक्षत्राणि.
कुलाकुलनिर्णयः.
ध्रुवनक्षत्राणि.
जातिनक्षत्राणि.
नक्षत्रस्वरूपाणि.
योगाधिपाः.
करणाधिपाः.
मुहूर्तप्रतिनामानि.
पौराणिकमुहूर्ताः.
जन्मकर्मादिनवविधनक्षत्रक्रमः.
प्रथमार्तवम्.
रजस्वलाप्रश्नदिक्फलम्.
रजस्वलास्थलनिर्णयः.
तत्फलम्.
धृतवस्त्रनिर्णयः.
तत्फलम्.
रजस्वलाबिन्दुसङ्ख्या.
तत्फलम्.
प्रथमार्तवतिथिफलानि.

नक्षत्रफलानि.
वारफलानि.
भोजनद्रव्यम्.
शुभनक्षत्राणि.
दुष्टनक्षत्राणि.
दुष्टनक्षत्रेषु वारव्यवस्था.
नक्षत्रफलानि.
विषादेशव्यवस्था.
कालफलम्.
योगफलम्.
करणफलानि.
लग्नफलानि.
रजस्वलालग्नसंग्रहस्थितिः.
मङ्गलाचारः.
रजस्वलाचक्रम्.
निषेकविधिः.
निषेकनक्षत्राणि.
तिथिविधिः.
वारविधिः.
राशिविधिः.
स्त्रीप्रधानकर्म.
केशबन्धनविधिः.
पुंसवनविधिः.
मासविधिः.
नक्षत्राणि.
तिथिविधिः.
वारविधिः.
अष्टमशुद्धिः.
गुरुशुक्रमौढ्येऽपि कर्तव्यता.
सीमन्तविधिः.
मासनिर्णयः.
सौरादिमासलक्षणम्.
विवाहकालनिर्णयः.
पुन्नपुंसकनक्षत्राणि.
तिथिविधिः.
पक्षविवाहविधिः.
राशिविधिः.
सीमन्तलग्नसंग्रहविधिः.
अष्टमस्थग्रहापवादः.
करणस्थानशुद्धिः.
तल्लग्नजन्मराश्योः कर्तव्यता.
प्रधानकर्माणि.

No. **13596.** संहिताशिरोमणिः.

SAMHITĀŚIRŌMAṆIḤ.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 158. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants the beginning and the end.

Same work as the above.

No. **13597.** सङ्क्रान्तिफलचक्रम्.

SAṄKRĀNTIPHALACAKRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 65*b* of the MS. described under No. 13561.

Complete.

On the drawing of an astrological diagram based on the position of the moon at the time when the sun passes from one sign of the zodiac to the next with a view to find out the good or evil befalling to a particular person.

Beginning:

अथातस्संप्रवक्ष्यामि ब्रह्मयामलनिर्मितम् ।
सङ्क्रान्तिशूलकं चक्रं सदा प्रत्ययकारणात् ॥
उडूनि विन्यसेत् पूर्वं चन्द्रभाद्यथपूर्वके ।
त्रिकोणं च लिखेच्चक्रं कोणाग्रेषु त्रिशूलकम् ॥
उडूनि विन्यसेत्पूर्वं चन्द्रभाद्यथपूर्वकम् ।
त्रयं षट्कत्रयं षट्कं त्रयं षट्कं न्यसेत् क्रमात् ॥
यत्र तिष्ठति जन्मर्क्षं ज्ञेयं तत्र शुभाशुभम् ।

End:

षड्भिः क्रूरसमायुक्तं तत्फलं च न विद्यते ।
शुभग्रहयुते शूले अशुभं नात्र विद्यते ॥

Colophon:

इति सङ्क्रान्तिफलचक्रं समाप्तः(म्) ॥

No. 13598. हायनरत्नम्. HĀYANARATNAM.


Substance, paper. Size, 10½ × 5½ inches. Pages, 192. Lines, 14 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete in eight Adhyāyas, the names of which are:—

१. ग्रहराशिस्वरूपवर्षप्रवेशाद्यानयनाधिकारः.
२. दृष्टिसाम्यबलकष्टाधिकारः.
३. षोडशयोगाध्यायः.
४. सहमाधिकारः.
५. वर्षेशादिविचारः.
६. भावविचाराध्यायः.
७. दशानयनाधिकारः.
८. मासप्रवेशादिविचाराध्यायः.

A treatise in astrology dealing with the topics mentioned above.

The author is Balabhadra and his genealogy is thus given :—



The author is said to have written a commentary on the Tājaka and to have consulted the works of Hillājaka, Khattakhutta, Āryakhiṇḍi, Rōmaka, Samarasiṁha, etc. He also states that he lived in Rājamahal, wrote the work in 1551 Śaka (1628 A.D.) and placed it in the hands of Sani Suja (Shuja Sha ?).

Beginning :

गणाधिपं रामगुरोः पदाब्जं दामोदराख्यं च गुरुं च नत्वा ।
प्राचीनपद्यैर्बलभद्रनामा करोति सद्धायनरत्नसंज्ञम् ॥
भागीरथीतीरविराजमाने श्रीकन्यकुब्जे नगरेऽतिरम्ये ।
अभूद्भरद्वाजमहर्षिवंशे श्रीलालनामा गणकोऽधिधामा ॥
तस्यात्मजः पञ्च बभूवुरेषां श्रीदेविदासः प्रथमं बभूव ।
व्यक्ते च यः श्रीपतिपद्धतौ च टीकां व्यधाच्छिष्यगणस्य तुष्ट्यै ॥
तस्माल्लघुः खेटविचारदक्षः प्रख्यातकीर्तिर्विगतारिपक्षः ।
श्रीक्षेमकर्णोऽथ ततः कनिष्ठो नारायणो व्याकरणे पटिष्ठः ॥
न्याये यस्सुरराजपूजितनिभो ने(वे)दान्तिनामग्रणीः
मीमांसादिसमस्तशास्त्रकमलप्रोद्भूनने भास्करः ।
श्रीमद्भूपतिबृन्दपूजितपदो भूदेवमूर्धाग्रणीः
श्रीमन्मिश्रचतुर्भुजात्(ज.)समभवत् तस्माल्लघुर्धर्मवित् ॥
तस्माल्लघुः सकलशास्त्रकलापटिष्ठो दामोदरः समभवत्कृतिनां वरिष्ठः ।
यो भास्करोदितपितामहकर्मतुल्यवृत्तिं व्यधान्निरूपमां कृतिनां हिताय ॥

दामोदरस्य तनयौ जातौ बलभद्रहरिरामौ ।
बलभद्रेण . . प्रकाश्यते(शितं) जातकं गुरोः कृपया ॥
निबन्धा रचिताः पूर्वैस्संहिता जातकादिषु ।
न हायनफले तस्मान्निबन्धं कर्तुमुद्यतः ॥
हिल्लाजखत्तखुत्तार्यखिधिरोमकसम्मतम् ।
सारं समरसिंहस्य क्रियते वार्षिकं फलम् ॥

ननु किमभिधेयकमिदं शास्त्रं प्रयोजनं च किम् । उक्तं च—
ज्ञानार्थज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धस्सप्रयोजनम् ॥ इति ॥

* * * *

यवनाचार्येण पारस्या भाषया प्रणीतं ज्योतिःशास्त्रैकदेशरूपं वार्षिकादिनानाविधफलादेशफलकशास्त्रं ताजकशब्दवाच्यं तदनन्तरसंभूतैः समरसिंहादिभिरधीतव्याकरणैः ब्राह्मणैः तदेव शास्त्रं संस्कृतशब्दोपनिबद्धन्तदपि ताजकशब्दवाच्यमेव ।

End:

ततोऽग्रिमवर्षप्रवेशकुण्डलीसहितो लेख्या इति वर्षपत्रलेखनक्रमः ॥
निर्मथ्य सत्ताजकशास्त्रसिन्धुं समुद्धृतो हायनरत्नसंज्ञम् ।
सद्वर्षपत्रीकरणोद्यतानां ज्योतिर्विदां कण्ठविभूषणस्य ॥
वेत्ति नान्यः परेशस्तु सिन्धुमञ्ज(मन्थ)नजं श्रमम् ।
इति सञ्चिन्त्य सोमेश त्वदङ्घ्रौ रत्नमर्पितम् ॥
पृथ्वीपतिमहावीरश्रीमत्सानिसुजान्तिके ।
श्रीराजमहलस्थेन मया ग्रन्थं विनिर्मितम् ॥
यो गोमासकृतैः समाकरहुतो योगस्थितिस्स्यात्तिथि-
त्रिघ्नावारमितिस्तदर्धसदृशं भं सर्वयोगोयुतिः ।
भूबाणाक्षकुभि (१५५१) भवेत्सकमिति ग्रन्थस्य तां वेत्ति यः
तं मन्ये गणितद्वयज्ञकमलप्रोद्बोधने भास्करम् ॥

Colophon:

इति श्रीमद्दैवज्ञवर्यपण्डितश्रीदामोदरात्मजबलभद्रपण्डितविरचिते हायनरत्ने मासप्रवेशादिविचाराध्यायोऽष्टमः । समाप्तोऽयमिति हायनरत्नाभिधानग्रन्थः ॥
संवत्सर २ . . २.

C. HOROSCOPY.

No. 13599. अंशफलम्.
AṀŚAPHALAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 22*a* of the MS. described under No. 5764.

Incomplete.

Herein the duration of the time of each Lagna is divided into 12 equal periods and the characteristics of a person born in each of these periods are described.

Beginning:

चोरस्वभोक्ता मतिमान् धनाढ्यः राजा च षण्डो विजयी दरिद्रः ।
कार्येषु दक्षः खलु कर्मकृतन्(र्ता)शूरश्च विद्यानिधिजातकान्तः ॥
पिशुनश्चपलो दुष्टः पापकर्मा निराकृतिः ।
व्यसने च परप्रेष्यः चोरस्य प्रथमांशके ॥
उत्पन्नविभवो भोक्ता बुद्धिमांश्च विचक्षणः ।
गान्धर्वप्रथमाशक्तिर्द्वितियांशे प्रजायते ॥

End:

नीतिज्ञो ज्ञानसंपन्नः त्यागी सत्यजितेन्द्रियः ।
धर्मार्थकाममोक्षाणां जायते द्वादशांशके ॥

No. 13600. अंशलग्नदशाभुक्तिनिरूपणम्.
AṀŚALAGNADAŚĀBHUKTINIRŪPAṆAM.

Substance, palm-leaf. Size, $21\frac{1}{4} \times 1\frac{1}{4}$ inches. Page, 1. Lines, 5 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 24*b* The other works herein are Rahasyatrayasārādhikārasaṅgraha (Tamil) 1*a*, Jyautiṣaviṣaya 17*a*, Lagnanighaṇṭu 21*b*, Grahanighaṇṭu 22*b*, Nakṣatranighaṇṭu 23*a*, Kārakanighaṇṭu 24*a*, Kēraḷajyautiṣa 25*a*, Śiśupālavadha 40*a*, Vēdāntadēśikavaibhavaprakāśikā (Maṇipravāla) 44*a*.

Incomplete.

On the method of finding out the position of the Lagna in the diagram called Rāśicakra and of noting down the planetary periods and sub-periods.

Beginning:

मेषसिंहधनुषि स्व(ख)जात(द)यः तौलिकुम्भमिथुने तुलादयः ।
कन्यकामृगवृषे मृगादयः मीनकर्क्यलिषु कर्कटादयः ॥

दशाभावः—

इनशशिकुजराहुजीवमन्दज्ञकेतुः भृगुज इति नराणां कृत्तिकादिक्रमेण ।
षट्सूर्यदशमश्चन्द्र सप्तसङ्ख्या धरासुतः ।
राहोरष्टादशश्चैव गुरोः षोडशवत्सराः ॥

End:

सुतमदननवान्त्यरन्ध्रलग्नेष्वशुभयुतो मरणाय शीतरश्मिः ।
यदि बलिभिर्न युतो न लोकतो वा.

No. **13601.** अङ्कनिघण्टुः.

ANKANIGHANṬUḤ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 2\frac{1}{8}$ inches. Pages, 2. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Begins on fol. *53a*. The other works herein are Aṣṭakavarga *1a*, Ariṣṭanavanīta (with commentary) *9a*, Jātakālaṅkāra *31a*, Jātakajīvana *45a*, Jyautiṣaviṣaya *54a*.

A lexicon of synonymous terms for denoting the numbers one to nine and zero.

Beginning:

शशी सोमश्शशाङ्कश्च इन्दुश्चन्द्रश्च रूपकम् ।
प्रलयं धरानिलयं हेम एका जनैः शिवम् ॥
अक्षि चक्षुः करं नेत्रं लोचनं द्विककर्णयोः ।
पक्षदृष्टिद्वयं युग्ममम्बकं नयनं द्वयम् ॥

End:

आकाशं गगनं शून्यं व्योम पुष्करमम्बरम् ।
खंग(च)वायुपदं तच्च श्रीकरानन्तभीकरम् ॥
एकं तु प्रथमं स्थानं द्वितीयं दशसंज्ञितम् ।
तृतीयं शतमित्याहुः चतुर्थं तु सहस्रकम् ॥

* * * *

महामृतं त्रयस्त्रिंशत् भूरिवेदाग्निसंज्ञितम् ॥

No. 13602. अङ्कनिघण्टुः.
AṄKANIGHAṆṬUḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 3*b* of the MS. described under No. *13567*.

Complete.

Same work as the above.

No. 13603. अङ्कनिघण्टुः.
AṄKANIGHAṆṬUḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 4*a* of the MS. described under No. 13565.

Complete.

Similar to the above.

The words denoting the numbers above nine are also given.

Beginning:

एकस्य भूरूपशशाङ्कनामान्यूहन्ति पूर्वं गणनाविधिज्ञाः ।
द्वयस्य संज्ञा . . . . कर्णवस्त्रं पक्षाक्षियुग्मं यमलौ करौ च ॥
पुराग्निलोकत्रयरामरत्नकालत्रयश्चैव भवन्ति संज्ञाः ।
वर्गाम्बुबिन्दु(निध्य)र्णववेदवर्णाश्रमश्चतुर्णां गतयो युगानि ॥

End:

द्वाविंशतेराकृतिस्तु चतुर्विंशजनाभिधः ।
तत्पावनी पञ्चविंशत्या षड्विंशत्सप्तविंशतिः ॥
द्वात्रिंशद्दन्तसंज्ञो च त्रयस्त्रिंशस्तथा सुरः ।
षट्त्रिंश . . . . खमार्गतः ॥
आहस्वर्धाङ्गनेत्रानं (?) तच्छेषं पदसंयुतम् ।
दिनमानं त्रिगुणितं भजन् कालं विनिर्दिशेत् ॥

No. 13604. अरिष्टनवनीतम्.
ARIṢṬANAVANĪTAM.

Pages, 25. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 13489.

Complete in the following six Paricchēdas :—

१. साधारणपरिच्छेदः
२. मातारिष्टम्.
३. पितारिष्टम्.
४. सर्वारिष्टम्.
५. सुतारिष्टम्.
६. अरिष्टभङ्गः.

Explains the astrological conditions and circumstances in a horoscope under which evils befall to a person's mother, father and other relations and the way in which these evils can be averted. According to the initial stanza and the colophon of the MS. described under the next number the author is Navanītanartanakavi.

Beginning:

सुनिश्चितानिश्चितयोगजाख्यं रिष्टं तथा निश्चितमायुषो(न्तः) ।
अनिश्चितक्रूरदशास्वयादि येनोद्भवं जन्मनि खेटगत्याम् ॥
द्रेक्काणनक्षत्रनवांशखेटैश्चतुर्विधं जन्मविधावरिष्टम् ।
पाकोऽष्टभेदस्तनये वहोर्थे पित्रोश्च तद्भ्रातृतदीश्वरेषु ॥

Colophon:

इति प्रथमपरिच्छेदः ।

* * * *

Colophon:

इत्यरीष्टनवनीते मातारिष्टपरिच्छेदः द्वितीयः ॥

End:

तीर्थाभिषेकग्रहयज्ञक्लृप्त्या यन्त्रादिरक्ष्याद्विनिहन्त्यरिष्टम् ।
दिकुस्थानकादीनि पृथग्भवानि रिष्टे च तद्भञ्जनयोर्विनश्यति (?) ॥
यस्याधिकं तत्फलमेव योग्यं समानतायामपि रिष्टमेव ।

Colophon:

इत्यरिष्टनवनीते अरिष्टभङ्गपरिच्छेदः ॥ अरिष्टनवनीतं सम्पूर्णम् ॥

No. 13605. अरिष्टनवनीतम्.

ARIṢṬANAVANĪTAM.

Substance, (Śrītāla). Size, 14 × $2\frac{1}{8}$ inches. Pages, 15. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 64*b*. The other works herein are Aṣṭakavarga 1*a*, Bṛhajjātaka 7*a*, 48*b* and 70*b*, Satphalagrantha 8*b*, Kālacakra 10*b*, Daśāphalagrantha 13*a*, Pañcāṅgavākya 25*a*, Jyautiṣaviṣaya 28*a*, Hōrāsāra 47*a* and 51*b*, Ariṣṭaviṣaya 71*b*, Hōrāpradīpa 77*a*.

Complete.

Same work as the above but with the following additional stanza in the beginning. This and the colophon quoted below give the name of the author.

Beginning :

नत्वा श्रीरङ्गेशं होराशास्त्राम्बुधिं समालोड्य ।
नवनीतनर्तनकविररिष्टनवनीतमाजह्रे ॥

Colophon :

इति नवनीतनर्तनकविविरचितं नवनीतारिष्टं समाप्तः(प्तम्) ॥

No. **13606.** अरिष्टनवनीतम्.

ARIṢṬANAVANĪTAM.

Substance, palm-leaf. Size, 19⅛ × 1¼ inches. Pages, 9. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 30*a*. The other works herein are Kēralarājayōgasāra 1*a*, Kārakanighaṇṭu 1*b*, Jātakacandrikā 2*a*, Rathacakra 4*b*, Bṛhajjātakavyākhyā 7*a*, Jātakamañjarī 12*a*, Praśnaphalaprāptikālanirṇaya 19*a*, Āyurviniścaya 20*b*, Aṣṭaiśvaryaphalagrantha 24*a*, Uḍudaśāphalādiviṣaya (with Telugu meaning) 34*a*, Jātakālaṅkāra 40*b*, Jyautiṣaviṣaya 43*a*, Jātakaviṣaya 59*a*, Kālacakragati 56*b*, Bhārgavasūtra 74*a*, Candrāṁśalagnādiyōgaphala 80*a*, Kōṭiyuddhacakra 87*a*.

Contains the Paricchēdas 1 to 6; but wants the beginning in the first Paricchēda and the end in the sixth Paricchēda.

Same work as the above.

No. **13607.** अरिष्टनवनीतम्—सव्याख्यानम्.

ARIṢṬANAVANĪTAM WITH COMMENTARY.

Pages, 42. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 13601.

Breaks off in the 6th Paricchēda.

Same text as that described above and together with a commentary thereon entitled Śrīdharā. The commentator quotes Vāgbhaṭa, Dēvakīrti, Dēvala and others.

Beginning :

अरिष्टनवनीतं यद्धोराशास्त्रात्समुद्धृतम् ।
व्याख्या विरच्यते येन श्रीधराख्या मनोरमा ॥

प्रथमं प्रथमारम्भे अभिमतदेवतां नमस्कृत्य प्रबन्धसंज्ञां कर्तृसंज्ञां च प्रकाशयति—

श्रीरङ्गेशं नत्वा होराशास्त्राम्बुधिं समालोड्य ।
नवनीतनर्तककविररिष्टनवनीतमाजह्रे ॥

अरिष्टनवनीतमरिष्टसारम् अरिष्टमिति मरणसूचकमशुभम् । तथोक्तं वैजयन्त्याम्-रिष्टारिष्टे शुभाशुभे इति । अथ श्लोकेनारिष्टस्य त्रैविध्यमाह—

सुनिश्चितानिश्चितयोगजाख्यं रिष्टं त्रिधानिश्चितमायुषोऽन्तः ।
अनिश्चितं क्रूरवशानुयोगाद्योगोद्भवं जन्मनि खेटगत्या ॥

रिष रुष हिंसायामित्यस्माद्धातोर्निष्ठान्तम् तन्मरणसूचकमित्युक्तं वाग्भटे—

अरिष्टं नास्ति मरणं दृष्टं रिष्टश्च जीवितमिति । तदरिष्टं त्रिविधम्—सुनिश्चितमनिश्चितं योगजमिति । तेषु त्रिषु योगजं रिष्टं तावदुच्यत इति । तदाह देवकीर्तिः—

आयुर्ज्ञानाभावे सर्वं विफलं हि कीर्त्यते यस्मात् ।
तस्मात्तज्ज्ञानार्थं रिष्टाध्यायं प्रवक्ष्यामि ॥

End:

कुलीरगौ पूर्णशशाङ्कजीवौ लग्ने चतुर्थे दशमे भवेताम् ।
जूकस्थितौ शुक्रबुधौ च शेषा लाभत्रिषष्ठेष्वमितं तदायुः ॥

जातस्य यस्य लग्नभूते चतुर्थभूते दशमभूते वा कटकराशौ पूर्णचन्द्रो गुरुश्च स्थितौ तुलागतौ शुक्रबुधौ शेषा ग्रहास्त्रिषडायस्थिताश्चेत्तस्यायुरमितं भवेदिति ।

देवलः—

बन्ध्वास्पदोदयविलग्नगतः कुलीरगीर्वाणनाथसचिवः सकलश्च चन्द्रः ।
जूके सितेन्दुतनयावपरे च लाभदुश्चिक्यशत्रुभवनेष्वमितं तदायुः ॥

No. 13608. अरिष्टलक्षणम्.

ARIṢṬALAKṢAṆAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 13489.

Incomplete.

States what relations are affected with ailments when a child happens to be born under certain astrologically bad conditions.

Similar to the above.

Beginning:

अरिष्टलक्षणं वक्ष्ये सर्वशास्त्रानुसारतः ।
पुत्रे जाते पिता श्रुत्वा सचेलः स्नानमाचरेत् ॥

उत्तराभिमुखो भूत्वा नद्यां वा देवघा(खा)तके ।
तटाके पुष्करे वापि ब्राह्मणैरनुमन्त्रितः ॥
दत्वा गोभूहिरण्यादि पश्चाल्लग्नं परीक्षयेत् ।
लग्नमेव प्रशंसन्ति ज्योतिश्शास्त्रप्रयोजकाः ॥
अरिक्तपाणिर्दैवज्ञं शृणुयात्पुत्रजन्मनि ।
ततश्शीर्षोदयं विद्यादायुः कालवशाद्यतः ॥

* * * *

अरिष्टसंहितायाम्—

रेवत्यश्विनियोर्मध्ये गण्डान्तं हि विधीयते ।
गण्डान्तस्य प्रमाणोऽयं घटिकानां चतुष्टयम् ॥
द्वे द्वे घटिकदान्त्यादौ(?) गण्डान्तमिति कथ्यते ।
आद्यनाड्यां तु जातस्य मातुर्मरणमाप्नुयात् ॥
द्वितीयायां पिता चैव तृतीयायां सहोदरः ।

End:

अभिजिल्लग्नम्—

सूर्यश्चतुर्थलग्नं च साभिजित्संज्ञिकं च तत् ।
सर्वदोषं निहन्त्याशु पिनाकी त्रिपुरं यथा ॥
सूर्यात्सप्तमलग्नं यद्गोधूलिकमिति स्मृतम् ।
सर्वदोषहरं यद्वा पापं गङ्गाजलं यथा ॥
गोधूलिकं च यो लग्नं भावलग्नं च कल्पितम् ।
गन्धर्वादिविवाहेषु वैश्योद्वाहे च योजयेत् ॥

No. 13609. अरिष्टलक्षणम्.

ARIṢṬALAKṢAṆAM.

Substance, palm-leaf. Size, 15⅞ × 1⅝ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 96*a*. The other works herein are Trailōkyadīpikā 1*a*, Dvādaśabhāvaphala 9*a*, Aṣṭakavarga (with Telugu meaning) 22*a*, Jyautiṣaviṣaya 36*a*, Savyāpasavyavākyanirūpaṇa 41*a*, Kālacakra 45*a*, Kōṭicakrayuddhayātrāyōgaphala 47*a*, Mahādaśāntardaśāphala 59*a*, Uḍudaśādiphala (with Telugu meaning) 75*a*, Jyautiṣaviṣaya 82*a*,

Kālacakrasāra 190*a*, Nakṣatranighaṇṭu 93*a*, Dēvamīnuṣarākṣasagaṇādiphala 95*a*, Svaracintāmaṇi 100*a*.

Incomplete.

Similar to the above.

Beginning:

अरिष्टलक्षणं वक्ष्ये सर्वशास्त्रानुसारिणम् (तत्) ।
पूर्वाषाढे च पुष्ये च पितरं मातरं सुतम्(:) ॥
मातुलं च मृधे हन्यात् प्रथमाद्याशतक . . . ।
पितरं त्वाद्यपापांशे द्वितीये मातरं तथा ॥

* * * *

पापाः त्रिकोणकेन्द्रस्थाः शुभाः षष्ठव्ययाष्टगाः ।
आदित्योदयवेलायां जातो यमपुरं व्रजेत् ॥

End:

इत्याह ब्रह्मशाण्डिल्याख्यः —

राहुश्चतुरष्टस्थो मरणाय निरीक्षितः ।
पापैर्वदन्ति वर्षैर्दशभिरेचिवाचार्यः ॥

* * * *

वक्रस्थो भूमिजश्चैव दक्षिणापार्श्वेदतः ।
नवमे च चतुर्विंशस्सप्तविंशं भवेत्तथा ।
शुभानि शीघ्रविज्ञेयवामवेदो भवेत्तथा (?) ॥

No. 13610. अरिष्टविषयः.
ARIṢṬAVIṢAYAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 71*b* of the MS. described under No. 13605.

Complete.

Similar to the above.

Beginning:

फलनिर्देशार्थमन्यत्रोक्ता ग्रन्था लिख्यन्ते—

बृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुसौम्यार्कजदृष्टमूर्तिः ।
अब्दैस्त्रिभिर्भार्गवदृष्टिहीनो लोकान्तरं प्रापयति स्म जातम् ॥
वक्री शनिर्भौमगृहं प्रपन्नः लग्ने च षष्ठे च चतुष्टये वा ।
कुजेन सम्प्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रसूतम् ॥

* * * *

उडुपतिकृतरिष्टानां भङ्गस्तावन्निरूप्यते पूर्वम् ।
सम्य . . . . . शेषाणामपि यथामतं ब्रह्मपूर्वाणाम् ॥
सर्वैर्गगनभ्रमणैः दृष्टश्चन्द्रो विनाशयति रिष्टम् ।
आपूर्यमाणमूर्तिः यथानृपस्तनयकृतदोषम् ॥

End:

यत्नेन भङ्गमपरे सरोजजन्म इति विस्मयं कुरुते ।
तज्ज्ञः कष्टमनिष्टं समकटदेशे यदाशदः ॥
बहवो यदि शुभफलदा रोगाप्ता हीयतेऽरिष्टम् ।
सूर्यत्रिकोण इन्दौ यथाभियात्रा नरेन्द्रस्य ॥
इत्येतेऽन्यग्रन्थाः.

Colophon:

इतिरिष्टोक्तिभङ्गी ॥

No. 13611. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 6470.

Wants the beginning and the end.

Same work as that described under R. No. 371(*d*) of the Triennial Catalogue of MSS., Vol. I, Part I-B.

No. 13612. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Substance, palm-leaf. Size, 12¼ × 1 inches. Pages, 9. Lines, 4 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nakṣatranighaṇṭu 6*a*, Rāśinighaṇṭu 7*b*, Bhāvanighaṇṭu 8*a*, Lagnādyadhipatiphalanirūpaṇa 9*a*, Grahanighaṇṭu 10*a*, Jyautiṣa 12*a*.

Wants the beginning and the end.

Same work as the above. A small portion at the end is in Tamil.

No. **13613.** अष्टकवर्गः.

ASTAKAVARGAH.

Pages, 43. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 2479.

Wants the beginning and the end.

Same work as the above.

No. **13614.** अष्टकवर्गः, आन्ध्रटीकासहितः.

ASTAKAVARGAH WITH TELUGU MEANING.

Pages, 28. Lines, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 13609.

Incomplete.

